International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(5): 218-223
© 2022 IJSR
www.anantaajournal.com
Received: 08-07-2022
Accepted: 12-08-2022

**डॉ. कृष्णा शर्मा**
**सह-आचार्या,धर्मशास्त्रविभागः,**
**केन्द्रीय-संस्कृत-विश्वविद्यालयः,**
**जयपुरपरिसरः, जयपुरम्,**
**राजस्थानम्, भारतम्**

**Corresponding Author:**
**डॉ. कृष्णा शर्मा**
**सह-आचार्या,धर्मशास्त्रविभागः,**
**केन्द्रीय-संस्कृत-विश्वविद्यालयः,**
**जयपुरपरिसरः, जयपुरम्,**
**राजस्थानम्, भारतम्**

# संस्कृतवाङ्मये विद्याविमर्शः

## डॉ. कृष्णा शर्मा

**शोधसारांश:**
चतस्त्र: विद्यारूपी अमृततत्वं प्राप्त्यर्थं वैदिकशिक्षापद्धतौ वैदिककालानन्तरं सदैव धर्मशास्त्राणामध्ययनाध्यापनं सारभूतं दृश्यते। तत्र श्रौतधर्मगृह्यसूत्राणां स्मृतीनां पुराणेतिहासानां चान्यतमं स्थानं वर्तते। एतैर्विषयैर्वर्णाश्रमसंस्थायाः संरचना विकासश्च समारब्धः। पुराणन्यायमीमांसादिषु ग्रन्थेषु चतुर्दशस्थानेषु विद्या वैदिकशिक्षारूपेण निगूढा । वैदिकशिक्षायाः स्वरूपं द्विविधं वर्तते । प्रथमं वैदिकसूक्तानि, मन्त्रास्तेषां ब्राह्मणानि,द्वितीयं सूक्तादीनां यज्ञकर्मणि विनियोगः। वैदिकसाहित्यस्य अध्ययने वेदाङ्गानां शिक्षा-कल्प-निरुक्त छन्द- ज्योतिष-व्याकरणानां महत्त्वं दृश्यते। वेदाङ्गानां ज्ञानं न केवलं मन्त्राणां रचनायै अपितु तेषामर्थबोधाय तदनु विनियोगायाप्यपरिहार्यमस्ति। अस्मिन्नेव क्रमे पुराणन्यायमीमान्सादि चतुर्दशविद्यानां परिचयं शोधलेखेऽस्मिन् प्राप्स्यामः।

**कूटशब्दाः** विद्या, पराविद्या, अपराविद्या, आत्मतत्वं, परतत्वं, मृत्युर्ध्रुवं,आन्वीक्षिकी ,चतुर्दशविद्या , त्रयी ,वार्त्ता ,दण्डनीति :

**प्रस्तावना**
अस्मिन् संसारे यस्य जन्म भवति तस्य मृत्युरपि निश्चितः।मानवजीवने गमनागमनस्य चक्रमेवमेव प्रचलति ।भगवद्गीतायां भगवद्कृष्णेनोक्तं यत् -"जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्ममृतस्य च ।"[1] मानवजन्मस्योद्देश्यं किमस्ति ? जन्मनः मृत्युपर्यन्तं एषा यात्रा केन प्रकारेण यातव्या? स्वस्य कानि कानि कर्त्तव्यानि सन्ति? एतादृशानां प्रश्नानां समाधानाय अस्माकम् ऋषिभिः नैकाः ग्रन्थाः प्रणीताः। श्रुतिस्मृतिपुराणादिषु ग्रन्थेषु आचारव्यवहारप्रायश्चित्तादीनि विषयानि प्रतिपादितानि । एतेषां विषयाणाम् उत्कृष्टबुद्धिः श्रद्धयावबोधनमर्हति। उत्कृष्टप्रज्ञाप्राप्त्यर्थं, शास्त्रसिद्धिर्प्रयोजनार्थं विद्यार्जनमावश्यकम्। यतोहि विद्यामाध्यमेनैवेह संसारं पारयति जनः। ईशावस्योपनिषदि उक्तञ्च-

**विद्यां चाविद्यां च यस्तद्वेदोमयं सह ।**
**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।।**[2]

अर्थात् यः विद्याम् अविद्यां च ज्ञात्वा मृत्युं तीर्त्वा विद्यया अमृततत्वं प्राप्नोति । अत्र विद्याशब्दः विशिष्टार्थे प्रयुक्तः। सामान्यरूपेण तु यस्य कस्याऽपि विषये ज्ञानार्जनं विद्या उच्यते, किन्तु यत् ज्ञानं ज्ञानार्जनयोग्यं न भवति तत्

अविद्यानाम्ना प्रतिथम् यथा - द्यूतविद्या,चौरविद्या इत्यादयः। एताः विद्याः तु सन्ति किन्तु ज्ञानार्जनधारणयोग्याः च न सन्ति। अतःद्यूतविद्या इत्यासां धारणयोग्यज्ञानं नावश्यकम्। विद्याविद्ययोर्भेदस्य ज्ञानमावश्यकम्। यतोहि अविद्यायाः ज्ञानेनैव विद्यायाः ज्ञानं संभवम्। अनयोः विद्ययोः परस्परभेदविषये ज्ञात्वैव स्वात्मज्ञानं बोधयितुं शक्यते। विद्या द्विविधा परा अपरा च। वैदिकयुगे पराविद्या विकसिताऽसीत् यया अक्षरं ब्रह्म मन्यते स्म। पराविद्या उपनिषद्विद्यास्ति यया अपराविद्या प्रतिष्ठाता । परब्रह्मापरब्रह्मेति उभे उपनिषद्विद्यया वेदविद्यया च विजिज्ञासितव्ये।

द्वितीया अपराविद्या वेद - वेदांगेतिहास - पुराण - न्यायशास्त्रान्वीक्षिकीत्यादयः विद्यायाः चतुर्दशस्थानानानि सन्ति, येषां विषये याज्ञवल्क्येनोक्तम् –

**पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।**
**वेदस्थानानि विद्यानां धर्मस्य च चतुर्दशः ।। [3]**

विद्यायाः चतुर्दशस्थानानां विशदं परिचयःनिम्नरूपेण वर्तते–

### 1. पुराणम्

पुराणानां रचयिता वेदव्यासः स्वीकृतः। विद्वज्जनैः पुराणशब्दो बहुधा व्याख्यातः। तद्यथा- १पुराभवं पुराणम्, २ पुरणात् पुराणम्, ३ पुरार्थेषु आनयतीति पुराणम्पुरा परम्परां वक्ति पुराणं तेन वै स्मृतम्।विष्णुपुराणे वर्णितविषयस्याधारः पुराणपञ्चलक्षणं उक्तम् तद्यथा –

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥ [4]**

तत्र सृष्ट्युत्पत्ति-वर्णनं सर्गः। प्रलयानन्तरं पुनः सृष्ट्युत्पत्तिवर्णनं प्रतिसर्गः। वंशशब्देन नृपाणाम् ऋषीणाञ्च वंशवर्णनमभिप्रेतम् । मनूनां कालस्य तदानीन्तनवृत्तानां च वर्णनं मन्वन्तरम्। सूर्यचन्द्रादिवंशवर्णनं वंशानुचरितम् च वक्तुं शक्यते। विष्णुपुराणे अष्टादशपुराणानामुल्लेखो प्राप्यते तद्यथा –

**अष्टादशपुराणानि पुराणाज्ञाः प्रचक्षते ।**
**ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ॥**
**तथान्यन्नारदीयं च मार्कण्डेयञ्च सप्तमम् ।**
**आग्नेयमष्टमञ्चैव भैविष्यं नवमं स्मृतम् ॥**
**दशमं ब्रह्मवैवर्त लैङ्गमेकादशं स्मृतम् ।**
**वाराहं द्वादशञ्चैव स्कान्दञ्चैव त्रयोदशम्॥**
**चतुर्दशं वामनञ्च कौर्मं पञ्चादर्श स्मृतम्।**
**मात्स्यञ्च गारुडञ्चैव ब्रह्माण्डञ्च ततः परम् ॥**

### पुराणेषु प्रतिपाद्यविषयः

पुराणेषु प्रतिपाद्यविषयाणामुल्लेखः पुराणलक्षणे जातः। तत्र प्राधान्येन देवोपासना वर्णिताऽस्ति । तदङ्गत्वेनैव

व्रतोपवासादीनि वर्णितानि। नीति-आयुर्वेद- काव्य-शास्त्रादिसम्बद्धानि तत्त्वानि अपि निहितानि । भारतीयायाः सभ्यतायाः संस्कृतेश्च यथार्थज्ञानप्रदाविद्या पुराणेषु व्यक्ता। प्राचीनभारतस्य ज्ञानविज्ञानं तत्र सुरक्षितम्। प्राचीनभारतस्य विश्वकोषस्वरूपाविद्याऽपि पुराणेषु निहिता । विश्वस्य प्राचीनायाः भौगोलिकस्थितेरपि ज्ञानस्वरूपा विद्या पुराणसाहित्याद् भवति ।

### 2. न्यायदर्शनम्

न्यायविषये विविधाः परिभाषाः दरिदृश्यन्ते। नीयते विवक्षितार्थोऽनेनेति न्यायः । वात्स्यायनमतेन प्रमाणैरर्थपरीक्षणं न्यायः । प्राचीनन्यायो नव्यन्यायश्चेति

न्यायस्य भेदद्वयम् विद्यते । प्राचीनन्यायस्य प्रणेता गोतमः नव्यन्यायश्च गङ्गेशोपाध्यायः । गोतमस्य कृतिः न्यायसूत्रम् । न्यायसूत्रे प्रमाणं, प्रमेयः, संशयः, प्रयोजनं दृष्टान्तः सिद्धान्तः, अवयवः,तर्कः, निर्णयः, वादः, जल्पः, वितण्डा, हेत्वाभासः, छलं, जातिः निग्रहस्थानमिति षोडशपदार्थाः वर्णिताः। एतेषां ज्ञानेन मोक्षप्राप्तिर्भवति। गङ्गेशोपाध्यायः तत्त्वचिन्तामणिं विरच्य नव्यन्यायस्य प्रवर्तनमकरोत्। प्रमाणमीमांसा हि नव्यन्यायविषयः। गङ्गेशेन प्राचीनन्यायवर्णितानां षोडशपदार्थानां द्रव्यादिसप्तपदार्थेषु अन्तर्भावं कृत्वा प्रमाणानि परिमार्जितानि । न्यायदर्शने स्वीकृतानां प्रत्यक्षानुमानोपमानशब्दाख्यानां प्रमाणानामत्र विशेषतो विवेचनं कृतम्।

### 3. मीमांसादर्शनम्

पुराणेषु जैमिनिः व्यासशिष्यत्वेन वर्णितः। जैमिनिविरचितं मीमांसासूत्रम् मीमांसादर्शनस्य प्राचीनतमो ग्रन्थः।आद्याः द्वादशाध्यायाः द्वादशलक्षणीति संज्ञया प्रसिद्धाः। अवशिष्टाः

चत्वार: अध्यायाः दैवतकाण्डसंज्ञकाः। वेदेषु याज्ञिकप्रक्रियादृष्ट्या अस्पष्टानां सन्दिग्धानां च वचनानां शङ्कासमाधानपूर्वकं स्पष्टीकरणं, परस्परविरोधिवचनानां समन्वयश्च मीमांसायाः प्रयोजनम्। मीमांसादर्शनं वैदिककर्मकाण्डस्य समर्थकम्। एतदनुसारेण कर्मणैव अभ्युदयनिःश्रेयस् प्राप्तिर्भवति । कर्मजन्यम् अपूर्वमेव कर्मफलप्रदम्।

**4. धर्मशास्त्रम्**

धर्मविषयकशास्त्रं धर्मशास्त्रम्। धर्मो धर्मशास्त्रस्य वर्ण्यविषयः। "ध्रियते अनेनेति धर्मः" इति व्युत्पत्त्या धर्मशब्द: सामान्यत आचारव्यवहारस्य बोधकः। "धर्मशास्त्र का इतिहास" नामके ग्रन्थे धर्मविमृशन्नाह ग्रन्थकार: - "प्राचीनकाल में धर्मसम्बन्धी धारणा बड़ी व्यापक थी और वह मनुष्य के सम्पूर्ण जीवन को स्पर्श करती थी। धर्मशास्त्रकारों के मतानुसार धर्म किसी सम्प्रदाय या मत का द्योतक नहीं है, प्रत्युत यह जीवन का एक ढंग या आचरण संहिता है, जो समाज के किसी अंग या व्यक्ति के रूप में मनुष्य के कर्मों एवं कृत्यों को व्यवस्थापित करता है तथा उसमें क्रमशः विकास लाता हुआ, उसे मानवीय अस्तित्व के लक्ष्य तक पहुँचने के योग्य बनाता है।"[5] "धर्मशास्त्र का इतिहास" अस्मिन् ग्रन्थे धर्मस्य लक्षणं कुर्वन्नाह वैशेषिकसूत्रकारः- "यतोऽभ्यदुयनिःश्रेयससिद्धिः स धर्मः"।[6] वेदो धर्ममूलम्। धर्मशास्त्रे वैदिकज्ञानमेव स्मृतम्। अत एवास्य स्मृतिरित्यपि संज्ञा-"धर्मशास्त्रं तु वै स्मृतिः"।[7] वर्णाः, आश्रमाः, तेषां विशेषाधिकारः,कर्त्तव्यम्,उत्तरदायित्वं च धर्मशास्त्रस्य वर्ण्यविषयः। धर्मशास्त्रग्रन्था: त्रिधा विभज्यते – १. धर्मसूत्राणि २. स्मृतयः ३. प्रकरणग्रन्थाश्चेति। याज्ञवल्क्यनिर्दिष्टाः स्मृतिकाराश्च अधोवर्णिता:

**मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।**
**यमापस्तम्बसंवर्ता: कात्यायनबृहस्पती ॥**
**पराशरव्यासशङ्खलिखिता: दक्षगोतमौ ।**
**शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः॥** [8]

**5. ऋग्वेदः** ऋचां संग्रह: ऋग्वेदः ।ऋच्यते स्तूयते देवता यया सा ऋक् । ऋग्वेदस्य संहिता ब्राह्मणं चेति द्वौ भागौ स्तः । देवस्तुतिः ऋग्वेदस्य मुख्यो विषयः। ऋग्वेदेइन्द्राग्निवरुणादीनां देवतानां स्तुतयः सन्ति। यास्कस्य मतेन देवताः त्रिविधाः पृथ्वीस्थानीया, अन्तरिक्षस्थानीया: द्युस्थानीयाश्चेति मन्त्रस्य अर्थज्ञानाय तत्सम्बद्धदेवताज्ञानं परमावश्यकम्। तदुक्तं च

**"वेदितव्यं दैवतं हि मन्त्रे मन्त्रे विशेषत: ।**
**दैवतज्ञो हि मन्त्राणां तदर्थमधिगच्छति। ॥**[9]

ऋग्वेदे आपाततः बहुदेववादः प्रतीयते । परं तस्य पर्यवसानम् एकेश्वरवादे भवति। तदुक्तं च –

**इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यस्सुपर्णो गरुत्मान् ।**
**एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं**
**मातरिश्वानमाहुः॥**[10]

अपि चोक्तं यास्केन -

**महाभाग्याद्देवताया एक एव आत्मा बहुधा स्तूयते ।**[11]

**6. यजुर्वेदः** यजुर्वेदे अध्वर्युसम्बद्धाः याजकीयमन्त्राः संगृहीताः। इज्यतेऽनेनेति यजुः । यजुषां (यज्ञविधानमन्त्राणां) संग्रह: यजुर्वेदः। केषाञ्चन मतेन गद्यात्मको मन्त्रो यजुः। यजुर्वेदसंहितायां गद्यात्मकमन्त्रा एव सङ्कलिताः सन्ति । यजुर्वेदस्य संहिता ब्राह्मणं चेति द्वौ भागौ स्तः ।

**7. सामवेदः** उद्गात्रा गीयमानानां स्तुतिमन्त्राणां संग्रहः सामवेद: गेयाः ऋचः सामानि। तदुक्तं च "अर्थव्यवस्थितपादाः ऋचः। ताः सगीतय: सामानि"। सामवेदस्य संहिता ब्राह्मणं चेति द्वौ भागौ स्तः।

**8. अथर्ववेदः** ब्रह्मोपयोगिनां मन्त्राणां संग्रहः अथर्ववेदः। यज्ञस्य निरीक्षणं तत्र त्रुटीनां निवारणं च ब्रह्मणः कार्यम् । अस्य वेदस्य "आथर्वाङ्गिरस" इत्यपि संज्ञा अथर्वन्पदेन रोगनिवारकमन्त्राणां द्रष्टारः ऋषयः, आङ्गिरसपदेन च मारणमोहनोच्चाटनादिविषयकमन्त्राणां द्रष्टारः ऋषयः गृह्यन्ते । अथर्ववेदस्य संहिता ब्राह्मणं चेति द्वौ भागौ स्तः ।

**वेदाङ्गानि**

वेदार्थस्य सम्यग्बोधाय वेदाङ्गानि रचितानि । सूत्रबद्धत्वाद् वेदाङ्गानि सूत्रेति संज्ञयाऽपि प्रथितानि ।

**9. शिक्षा**

स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते सा शिक्षा।शिक्षाविषयः तैत्तिरीयोपनिषदि सम्यग्निरूपितः। तद्यथा वर्णः स्वरः, मात्रा, बलं, साम, सन्तान इत्युक्तः शिक्षाध्यायः । तत्र वर्णः अकारादिः, स्वरः उदात्तादिः, बलं स्थानप्रयत्नौ, साम निषादादि, सन्तानो विकर्षणादिः । एतेषाम् अवबोधनमेव शिक्षायाः प्रयोजनम्।वेदमन्त्रपाठे उच्चारणस्य शुद्धतायाः नितरां महत्त्वपूर्णा विद्या ।

**10. कल्पः** कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रमिति ऋक्प्राति शाख्यकारः। कल्पसाहित्यं श्रौतसूत्र-गृह्यसूत्र-धर्मसूत्र-शुल्वसूत्रभेदात् चतुर्धा।

**11. व्याकरणम् - व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम्।:** व्याकरणं हि वेदपुरुषस्य मुखम्। तदुक्तं पाणिनीयशिक्षायाम् "मुखं व्याकरणं स्मृतम्"।[12] तथा चोक्तं महाभाष्ये- "प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान्भवति।। [13] महाभाष्यकारस्य पतञ्जलेः मतेन व्याकरणाध्ययनस्य पञ्चप्रयोजनानि । तदुक्तं तेन –

**"रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"** ।।[14]

(१) रक्षार्थं वेदानाम् अध्येयं व्याकरणम् ।

(२) ऊहः खल्वपि।

(३) आगमः खल्वपि।

(४) लघ्वर्थं चाध्येयं व्याकरणम्।

(५) असन्देहार्थं चाध्येयं व्याकरणम्।

**12. निरुक्तम्**

निरुक्तं वैदिकशब्दानां निर्वचनशास्त्रम्। निरुच्यते तनदर्थावयोधनाय पदजातं यत्र तन्निरुक्तम् ।इदं व्याकरणस्य पूरकं शास्त्रम्। निरुक्तस्य प्रतिपाद्यविषया: अधोनिर्दिष्टा:-

**वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥**[15]

वैदिकशब्दानाम् अर्थनिर्धारणमेव अस्य प्रतिपाद्यविषयः। अस्य वर्ण्यविषयस्य त्रीणि रूपाणि मन्त्रार्थज्ञानं देवविद्यानिर्वचनं च ।

**13. ज्योतिषम्**

ग्रहगणितं ज्योतिषम्। यज्ञसम्पादने हि वेदानामुपयोगिता । यज्ञानुष्ठानाय शुभमुहूर्त्तस्य ज्ञानमावश्यकम्। यज्ञाः निर्धारितमुहूर्त्ते एव सम्पादनीयाः भवन्ति। तादृशकालज्ञानाय ज्योतिषं परमावश्यकम्। तदुक्तं च

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञा:**
**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेदयज्ञान् ॥**[16]

वेदाङ्गेषु ज्योतिषस्य प्रमुखं स्थानम्। तदुक्तं च।

**यथा शिखा मयूराणां नागानां मणयो यथा ।**
**तद्वद्वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम् ॥**[17]

**14. छन्दः** कात्यायनः सर्वानुक्रमण्या छन्दलक्षणे प्रतिपादयन्नाह **"यदक्षरपरिमाणं तच्छन्दः"। यास्कमतेन छन्दश्शब्दः छदिधातोः निष्पन्नः। तदक्तं तेन "छन्दांसि छादनादिति।** मन्त्राणां शुद्धपाठाय सम्यगर्थज्ञानाय च छन्दोवेदाङ्गस्य नितरां महत्त्वम उपयोगिता च। अस्य वेदाङ्गस्य प्राचीनतमग्रन्थस्त् पिङ्गलकृत छन्दसूत्रमेव। अस्मिन् वैदिकानां लौकिकानां च छन्दसां लक्षणानि प्राप्यन्ते।

एतेषु पुराणन्यायमीमांसादिषु ग्रंथेषु चतुर्दशस्थानेषु विद्या वैदिकशिक्षारूपेण निगूढा। वैदिकशिक्षायाः स्वरूपं द्विविधं वर्तते । प्रथमं वैदिकसूक्तानि, मन्त्रास्तेषां ब्रह्मणानि। द्वितीयं सूक्तादीनां यज्ञकर्मणि विनियोगः। वैदिकसाहित्यस्य रचनायां वेदाङ्गानां- शिक्षा-कल्प-निरुक्त छन्द- ज्योतिष - व्याकरणानां ज्ञानमपेक्षते ।वेदाङ्गानां ज्ञानं न केवलं मन्त्राणां रचनायै अपितु तेषामर्थबोधाय तदनु विनियोगायाप्यपरिहार्यमस्ति ,मनुनापि उक्तम्-

**वेदशास्त्रार्थतत्वज्ञो यत्र तत्राश्रमे वसन्।**
**इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते ।।**
**सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम्।**
**तदध्यग्रयं सर्वविद्यानां प्राप्यते ह्यमृतं ततः ।**[18]

यःवेदशास्त्रस्यार्थतत्वं जानाति यत्र तत्राश्रमे स्थित्वा नित्यनैमित्तिककर्मानुगृहीतब्रह्मज्ञानेन अस्मिन्नेव लोके तिष्ठन्

बह्मतत्वाय कल्पते। आत्मज्ञानं परं तत्त्वमस्ति इत्यर्थं प्रतिपादनाय मनुना विषयाणां विभाजनं वर्गत्रयेण कृतम्, यथा - लौकिकं वैदिकं वाऽपि तथाध्यात्मिकमेव च ।[19] तत्र लौकिकस्तु शिल्पकला, वाणिज्यौद्योगिकी शिक्षा, वेदवेदाङ्गानां साङ्गोपाङ्गाध्ययनं वैदिकशिक्षा तथा च आन्वीक्षिकी, आध्यात्मिकीशिक्षारूपेण गण्यते ।

एवमेव महाभारते श्रेष्ठयोपपन्नानां जनानां महत्त्वपूर्णोपलब्धिः संसर्गविद्या प्रतिभाति । तत्र बहूनां पदानां समाहारः संसर्गे लक्ष्यत इति **"संसर्गविद्यासु"** इति पदेन स्पष्टम्। कौरवाः संसर्गविद्यानिष्णाता आसन् ।तद्यथा सोमसूरिणा व्यवहृतं संसर्गविद्या-नाट्य-नृत्य-संगीतादि-मनोरञ्जनात्मिकी प्रतिभाति ।

कौटिल्यस्तु अर्थशास्त्रस्यविनयाधिकरणे विद्यानां परिधिं परिभाषते स्म । तदनुसारेण तत्त्वार्थदृष्ट्या विद्याचतस्रः-आन्वीक्षिकी, त्रयी, वार्ता दण्डनीतिश्च। आन्वीक्षिकी हेतुविद्या -आत्मविद्या अस्ति। ऋक्यजुसामवेदानां समावेशो त्रयीविद्यायां वर्तते। कृषिपशुपालनव्यापारित्यादिनां निर्देशिका विद्या,वार्ता। दण्डस्वरूपप्रतिपादिका विद्या दण्डनीतिः वर्तते । कामन्दकीयनीतिसारे प्रतिपादितमस्ति यत्-

**आन्वीक्षिकी त्रयी वार्त्ता दंडनीतिश्च शाश्वती ।**
**विद्याश्चतस्र एवैता इति नो गुरुदर्शनम् ॥**
**आन्वीक्षिक्यात्मविज्ञानं धर्माधर्मौ त्रयीस्थितौ ।**
**अर्थानर्थौ तु वार्तायां दण्डनीतौ नयानयौ ॥**[20]

एताभिः चतस्रविद्याभिः लोकसंस्थितिहेतवानां धर्माधर्मानां ज्ञानं भवति। मनुशिष्याःआन्वीक्षिकीविद्यान्तर्भाव त्रयीविद्यायामेव स्वीक्रियन्ते। तेषां वचनपुष्टिः कामन्दकीयनीतिशास्त्रे प्राप्नोति । आन्वीक्षिक्यां तर्कशास्त्रवेदान्ताद्यन्तर्भावः, त्रय्यां मीमांसास्मृत्यादेः। तथा च

**वर्णाः सर्वाश्रमाचैव विद्यास्वासु प्रतिष्ठिताः ।**
**ईक्षणाद्रक्षणात्तासां तद्धमस्यांशभाङ् नृपः ॥**
**आन्वीक्षिक्यात्मविद्या स्यादीक्षणात्सुखदुःखयोः ।**
**ईक्षमाणस्तथा तत्त्वं हर्षशो कौ व्युदस्यति ॥**
**ऋग्यजुः सामनामानस्त्रयो वेदास्त्रयी मता ।**
**उभौ लोकाववाप्नोति त्रय्यां तिष्ठन् यथाविधि ॥**
**अंगानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।**
**धर्मशास्त्रं पुराणं च त्रयीदं सर्वमुच्यते ॥**
**पाशुपाल्यं कृषिः पण्यं वार्तावार्तानुजीव्यपि ।**
**संपन्नो वार्तयासाधुर्न वृत्तेर्भयमृच्छति ॥**[21]

कौटिल्य आन्वीक्षिकीं सर्वोपरि मन्यते । तेनोक्तम् -

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।**
**आश्रयःसर्वधर्माणां शाश्वदान्वीक्षिकी मता ।** [22]

आन्वीक्षिकीविद्ययैव सर्वधर्मकर्मविद्योपायानां ज्ञानं संभवति। अतः साररूपेण वक्तुं शक्यते यत् चतस्रविद्यारूपी अमृततत्वं प्राप्त्यर्थं वैदिकशिक्षापद्धतौ वैदिककालानन्तरं सदैव धर्मशास्त्राणामध्ययनाध्यापनं सारभूतं दृश्यते ।तत्र श्रौतसूत्रधर्मसूत्र गृह्यसूत्राणां स्मृतीनां पुराणेतिहासानां चान्यतमं स्थानं वर्तते । एतैर्विषयैर्वर्णाश्रमसंस्थायाः संरचना विकासश्च समारब्धः।मनुनापि उक्तम् –

**प्रत्यक्षम् चानुमानं च शास्त्रं च विविधागमनम् ।**
**त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सिता ॥**
**तपो विद्या च विप्रस्य निःश्रेयस्करं परम्।**
**तपसा किल्विषं हन्ति विद्ययाऽमृतमश्नुते।।** [23]

**संदर्भाः**


1. श्रीमद्भगवद्गीता 2/27
2. ईशावास्योपनिषद्-11
3. याज्ञवल्क्यस्मृतिः / आचाराध्यायः - 1/3
4. वराहपुराणम् 2.4
5. धर्मशास्त्र का इतिहास पृ.155
6. वैशेषिक.1/1/2
7. मनुस्मृति: 2/10
8. याज्ञवल्क्यस्मृति:1/5-6
9. https://sa.wikisource.org/wiki/बृहद्देवता/अध्यायः_१
10. ऋग्वेदः 1/164/46
11. निरुक्तम् 7/4
12. पाणिनीयशिक्षा 8/४२
13. महाभाष्यम्/पस्पशाह्निकम् 3/1/3
14. महाभाष्यम्/पस्पशाह्निकम् 3/1
15. काशिकापदमञ्जरी पृ. 670
16. आर्चज्योतिषम् 36, याजुषज्योतिषम् 3
17. याजुषज्योतिषम् 4
18. मनुस्मृतिः 12/102
19. मनुस्मृतिः 2/11
20. भगवन्तभास्करः नीतिमयूखः पृ.सं.45
21. भगवन्तभास्करः नीतिमयूखः पृ.सं.45
22. अर्थशास्त्रम् 1/ 2

23. मनुस्मृतिः 12/105,104

**सन्दर्भग्रन्था:**


1. श्रीमद्भगवद्गीता, गीताप्रेस गोरखपुरम्, 2017
2. इशावास्योपनिषद्,गीताप्रेस गोरखपुरम्, 2015
3. याज्ञवल्क्यस्मृतिः / आचाराध्यायः, डा.कमलनयन शर्मा,जगदीशसंस्कृतपुस्तकालयःजयपुरम्, 2009
4. मनुस्मृतिः, हरगोविंद शास्त्री,चौखम्भासंस्कृतभवनम्, वाराणसी, 2011
5. कौटिलीय-अर्थशास्त्रम्, डा.कमलनयन शर्मा, जगदीशसंस्कृतपुस्तकालयः जयपुरम्, 2007
6. काशिकापदमञ्जरी,महामहोपाध्यायश्रीहरदत्तमिश्र,मेडिकलहाल मुद्रणालयः,काशी,1942
7. भगवन्तभास्कर: नीतिमयूख:, डा वेणीमाधव: शास्त्री,चौखंभा-संस्कृत-प्रतिष्ठानम्, नवदेहली, 2016
8. पाणिनीयशिक्षा, शिवराज आचार्य कौण्डिन्यायनः, चौखंभा-विद्या-भवनम्, वाराणसी, 2013
9. महाभाष्यम्/पस्पशाह्निकम्, रमणकुमारशर्मा, इस्टर्न बुक लिंकर्स, दिल्ली, 1982
10. धर्मशास्त्र का इतिहास मूललेखक: डॉ० पाण्डुरङ्गवामनकाणे,अनुवादक: अर्जुन चौबे काश्यपः,उत्तरप्रदेश हिन्दी संस्थान, लखनऊ, उ.प्र. 1982
11. वराहपुराणम्,पंडित हरिशिकेसा शास्त्री,एसियाटिक सोसायटी, पार्कस्ट्रीट, 1887
12. निरुक्तम्, प्रो. ज्ञानप्रकाश शास्त्री, परिमल पब्लिकेशन दिल्ली, 1998